ओ३म्

एको रसः करुण एव

PAGE NO.
DATE : / /

कारुण्यं जगतो मूलं काव्यमूलं निसर्गतः ।
करुणार्द्रस्य स्वान्तस्य रससिद्धिरनुत्तमा ॥

करुणस्य स्वरूपम् →

किं नाम जीवितम् ? जीवितं हि पञ्चष-दिनानां सुखानुभूतिः, भूयसां च वासराणां दुःखानुभूतिः। जीवने सुखदुःखयोः, हर्षसुखयोः, मित्रशत्रुत्वयोः, संभोग-विप्रलम्भयोः समन्वयो दरीदृश्यते। नहि सुखव्यतिरिक्तं दुःखम्, सुखं च दुःखव्यतिरिक्तम् । चक्रवद्द्वयोः परिवर्तन-वृत्तित्वम्। जगतो नश्वरतां प्रेक्ष्य तत्त्वज्ञैः तदसारताप्रति-पादनात् निवृत्तिमार्गः प्रस्तावितः। जीवनं शोकबहुलम्, इष्टनाश- अनिष्टप्राप्त्यादिप्रसगात् ।

करुणस्य वैविध्यम् →

करुणरसो शोक एव स्थायिभावत्वेनाभियते। करुणो हि रसः चित्तद्रवताम् आपाद्य लोकहृदयेन साधारणीकरणं विदधाति। करुणस्य एव क्वचिद् दयाभावेन, क्वचित् सहानु-भूतिरूपेण, क्वचित् समवेदनात्वेन समन्वितं सद् नानारूप-त्वं वैविध्यं चाप्नोति। दुःखमूलके सुखे, विप्रलम्भमूलके संभोगे, शोकमूलके हर्षे, परदुःखकातरता जन्य सहानुभूतौ, इष्टनाशान्तरजातसन्ततौ वात्सल्ये, विनष्टेष्टजनापत्ये वीरत्वे, ~~वियोग दुःखान्त~~ च करुणस्यैव प्राधान्यम् ।

एवमेव सर्वेऽपि रसाः करुणरसे निबद्धाः। करुणमूलत्वम् उद्वीक्ष्यैव सर्वेषां रसानां भवभूतिना उद्घोष्यते यत —

एको रसः करुण एव निमित्त भेदात्
भिन्नः पृथक् पृथगिव श्रयते विवर्तान्।
आवर्त-बुद्बुद -तरङ्गमयान् विकारान्,
अम्भो यथा सलिलमेव हि तत् समस्तम् ॥

भवभूतेरभिमतं सर्वेषां रसानां करुणमूलत्वम्। करुणरसादेव सर्वेषां रसानां आविर्भावः। यथा सलिलमेकमेव सद् भ्रम्यादिरूपेण नानाभेदान आपद्यते, तथैव करुणो रसोऽपि वैविध्यं प्रतिपद्यते। स एव क्वचित् करुणरसः, क्वचित् विप्रलम्भ-शृङ्गारः, क्वचिच्च रसान्तरम्।

करुणरसात् काव्योत्पत्ति→

करुणरसे चित्तद्रवीभावः। स एव काव्यस्य मूलम्। नान्तरेण चित्तद्रवत्वं ~~चित्त~~ चित्तद्रवत्वं तात्त्विकी सात्त्विकी अनुभूतिः। नैसर्गिकं चित्तद्रवत्वमेव करुण भावावेगे काव्यं आविर्भावयति। अतएव काव्यस्योत्पत्तिरपि करुणमूलैव उद्गीर्यते। क्रौञ्चद्वन्द्ववियोगजन्यं कारुण्यं आश्रित्यैव महाकवेर्वाल्मीकेः प्रथमा अभिव्यक्तिः-

मा निषाद प्रतिष्ठा त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

Scanned with CamScanner

PAGE NO.
DATE: / /

एतदेवाश्रित्य ध्वन्यालोककारेण आनन्दवर्धनेनोच्यते—

— काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥

आनन्दवर्धनेन रामायणस्य करुणरसान्वितत्वं करुणरस-प्राधान्यं च स्फुटमुद्घोष्यते । वाल्मीकिना आद्यन्तं करुण रसस्य निर्वाहोऽपि व्यधायि ।

यथा नैसर्गिकः प्रवाहः, सरसत्वं मधुरत्वं चेतः प्रसादजनकत्वं करुणरसे उपलभ्यते, न तथाऽन्यत्र । संभोगश्रृङ्गारवर्णने न तथा वैशिष्ट्यं माधुर्यं च, यथा विप्रलम्भे । अत एव श्रृङ्गारेऽपि विप्रलम्भस्य महत्त्वं उदीर्यते—

— 'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते ।'

माधुर्यं करुणरसे विप्रलम्भश्रृङ्गारे शान्तरसे च वैशिष्ट्यं भजते । अत एवोच्यते मम्मटेन —

आह्लादकत्वं माधुर्यं श्रृङ्गारे द्रुतिकारणम् ।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ॥

उत्तररामचरिते करुणरसः →

महाकविना भवभूतिना उत्तररामचरिते स्वीयः सिद्धान्तोऽयं करुणरसमूलकानां विविधरसानां निदर्शनैः संपोष्यते । सीतावियोगविषण्णस्य रामभद्रस्य करुणरस-मूलकं विप्रलम्भश्रृङ्गारं वर्णयति ——

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरिते-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥

सीतावियोगसन्तप्तो रामः करुणरसस्वरूप एवाभूत्-

अनिर्भिन्नो गभीरत्वादन्तर्गूढ घनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥

सीतया अपि तादृश्येवावस्था । सापि करुणस्य मूर्त्तिः, शरीरिणी विरहव्यथेव च प्रतिभाति -

करुणस्य मूर्त्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ।

यदा रामः स्वकीयावस्थायाः वर्णनं करोति तदा करुणरसस्य परिपाकः जायते -

हा हा देवि! स्फुटति हृदयं ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि॥

करुणमूलको रौद्ररसः यथा रामकृतसीतापरित्यागसन्तप्तस्य जनकस्योक्तौ -

एतद् वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः ।
क्रोधस्य ज्वलितुं तु झटित्यवसरश्चापेन शापेन वा ॥

करुणरसमूलं वात्सल्यं यथा रामकृत लवालिङ्गन वर्णने -
"परिणतकठोर-पुष्कर गर्भच्छदपीनमसृण सुकुमारः।
नन्दयति चन्द्रचन्दननिष्यन्द जडस्तव स्पर्शः॥"
करुणरसमूलस्य वीररसस्य वर्णनं यथा-
ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्भूरिघोर-घनघर्घर घोषमेतत् ।
ग्रासप्रसक्त हसदन्तकवक्त्रयन्त्र-
जृम्भा-विडम्बि विकटोदरमस्तु चापम् ॥
चन्द्रकेतु-लवयोर्युद्धवर्णने करुणरसमूलको वीररसो वर्णितः।
एवं सिध्यति यत् काव्यस्य मूलं करुणरसे एव निबद्धम्।
कारुण्याप्लुतचेतसः सरसभावावगाहित्वात् कल्पनाप्रवण-
-त्वाद् अनुभूतिसंजुष्टत्वाच्च सहृदयत्वं सहानुभूति-
-समन्वितत्वं च । यत्र सहृदयत्वं सहानुभूतिः कल्पना
मार्मिकानुभूतिश्च तत्र काव्यम् । तथाविधैव कृतिः
सहृदयाह्लादकारिणी विद्वज्जनमनोज्ञा लोकमनस्तो-
-षिणी च । एतद् विचार्यैव भवभूतिना प्रोच्यते-
- "एको रसः करुण एव"।